## ११.३ अविवक्षितवाच्यध्वनेः पद-वाक्यप्रकाशता

ध्वनिः द्विविधः- अविवक्षितवाच्यध्वनिः, विवक्षितान्यपरवाच्यध्वनिश्च। न विवक्षितः अविवक्षितः, अविवक्षितः वाच्यो यस्मिन् ध्वनौ सः अविवक्षितवाच्यध्वनिः। भवान् जानाति एव यद् अस्मिन् ध्वनौ अभिधया वृत्त्या बोध्यः वाच्यार्थः विवक्षितो न भवति। अपितु तस्माद् वाच्याद् भिन्नः अर्थः गृह्यते। स च भिन्नः अर्थः क्वचित् मुख्यार्थम् अत्यन्तं तिरस्कृत्य आयाति। क्वचित् च मुख्यार्थेनैव सम्बद्धं किमपि विशिष्टम् अर्थं गृह्णाति। यथा 'राम' इति पदस्य मुख्यार्थः दशरथस्य अपत्यम् रामः इति भवति किन्तु, यदा अर्थान्तरसङ्क्रमितः अर्थः ग्रहीष्यते तथा खरदूषणादिहन्तृत्व-विशिष्टस्य रामस्य बोधो भवति। अतएव अन्यः अर्थः अर्थान्तरम् तस्मिन् सङ्क्रमितः वाच्यार्थो यस्मिन् ध्वनौ स अर्थान्तरसङ्क्रमितवाच्यध्वनिः इति नामकरणम् अन्वर्थम् अस्ति। अत्यन्ततिरस्कृतवाच्यध्वनौ मुख्यार्थः अत्यन्तं भिन्नः भवति। यथा ''ससैताः समिधः श्रियः'' इत्यत्र समिध् 'शब्दस्य यज्ञीय-काष्ठमित्यर्थः भवति। परमत्र असौ वाच्यार्थः अत्यन्तं तिरस्कृतः अस्ति। अत्र 'समिधः' इत्यस्य साधनम् उपायो वा अर्थः अस्ति। अतएव अस्य अर्थो भवति अत्यन्तं तिरस्कृतः वाच्यार्थो यस्मिन् स अत्यन्ततिरस्कृतवाच्यध्वनिः इति।

अविवक्षितवाच्यध्वनेः द्वयोः भेदयोः व्यङ्ग्यतायाः उदाहरणानि भवता द्वितीये उद्योते पठितानि। साम्प्रतं भवान् व्यङ्ग्यरूपेण पद-वाक्ययोः प्रकाशतायाः उदाहरणानि पठिष्यति। एवमेव विवक्षितान्यपरवाच्यध्वनेरपि भेदानां क्रमेण पदप्रकाशतायाः वाक्यप्रकाशतायाः उदाहरणानि ज्ञास्यति।

---

**मूलपाठः**

**एवं व्यङ्ग्यमुखेनैव ध्वनेः प्रदर्शिते सप्रभेदे स्वरूपे पुनर्व्यञ्जकमुखेनैतत् प्रकाश्यते-**

**अविवक्षितवाच्यस्य पदवाक्यप्रकाशता।**
**तदन्यस्यानुरणनरूपव्यङ्ग्यस्य च ध्वनेः।।१।।**

---

**व्याख्या-** एवम्=द्वितीये उद्योते, व्यङ्ग्यमुखेनैव=व्यङ्ग्यार्थप्रतिपादकतया, न तु व्यञ्जकमुखेन, ध्वनेः=प्रतीयमानस्य सप्रभेदे=भेदोपभेदपूर्वकं, स्वरूपे=लक्षणे, प्रदर्शिते=व्याख्याते सति पुनः तेषाम् एव ध्वनिभेदानां व्यञ्जकमुखेन=व्यञ्जकशब्दानां प्रतिपादनेन, एतत्=अयं ध्वनेः स्वरूपम्, प्रकाश्यते व्याख्यायते। तथाहि-

अविवक्षितवाच्यस्य, तदन्यस्य विवक्षितान्यपरवाच्यस्य च अनुरणनरूपव्यङ्ग्यस्य ध्वनेः पद-वाक्यप्रकाशता (भवति) इत्यन्वयः। ध्वनेः यः अविवक्षितवाच्यध्वनिः अर्थात् लक्षणामूल-ध्वनिः। तदन्यस्य=तस्माद्=अविवक्षितवाच्यध्वनेः अन्यः भिन्नः यः विवक्षितान्यपरवाच्यरूपः ध्वनिः तस्य च, अनुरणन रूपव्यङ्ग्यस्य=संलक्ष्यक्रमव्यङ्ग्यस्य ध्वनेः वा पदप्रकाशता वाक्यप्रकाशता च भवति। ध्वनिभेदानाम् इयं पदप्रकाशता वाक्यप्रकाशता च व्यञ्जकत्वाभिप्रायेण प्रस्तूयेते।

**बोधप्रश्नः**

१. पदवाक्यप्रकाशता इत्यस्य कोऽर्थः?

२. ध्वनौ पदानां वाचकता स्मारकता वा स्वीकृता?

Scanned with CamScanner

३. अनुरणनरूपव्यङ्ग्य इत्यस्य कोऽर्थः?



## ११.३.१ अत्यन्ततिरस्कृतवाच्यध्वनेः पदप्रकाशता

पूर्वं भवान् पठितवान् यद् अविवक्षितवाच्यध्वनेः द्वौ भेदौ-अत्यन्ततिरस्कृतवाच्यध्वनिः अर्थान्तरसङ्क्रमितवाच्यध्वनिश्च। यदा मुख्यार्थबाधे अर्थान्तरस्य बोधे अभिधा असमर्था भवति, तदा लक्षणावृत्तेः प्रयोगो भवति। लक्षणया द्वाभ्यां प्रकाराभ्यामर्थः क्रियते- क्वचित् मुख्यार्थाद् अत्यन्तं भिन्नः अर्थः, क्वचित् मुख्यार्थेन सम्बद्धः एव किञ्चिद्विशिष्टः अर्थः। यथा- उपकृतम् इत्यस्य अपकृतमिति अत्यन्ततिरस्कृतः अर्थः। तथैव 'समिधः' इत्यस्य 'यज्ञीयकाष्ठानि' इत्ययं मुख्यार्थः तथा च 'श्रियः वर्धने उपायभूतः' अर्थः अत्यन्ततिरस्कृतः अर्थः। एवमेव अन्यत्रापि यत्र पदम् वाच्यार्थे अनुपन्ने सति लक्षणया वाच्यार्थाद् भिन्नमेवार्थं ददाति तत्र अत्यन्ततिरस्कृतं वाच्यं भवति। अत्यन्तं तिरस्कृतो वाच्यार्थो यत्र ध्वनौ सः अत्यन्ततिरस्कृतवाच्यध्वनिः। यदा कस्मिंश्चित् पद्ये, काव्ये, वाक्ये वा एकेनैव लाक्षणिकेन पदेन व्यङ्ग्यार्थः द्योत्यते तथा च स व्यङ्ग्यार्थः प्रधानत्वेन चारुत्वेन च ध्वनिकोटौ आयाति तदा अत्यन्ततिरस्कृतवाच्यध्वनेः पदप्रकाशता भवति। तथा च ध्वन्यर्थः (प्रतीयमानः) तत्र तस्माद् एव पदाद् व्यज्यते। अतः अत्यन्ततिरस्कृतवाच्यध्वनेः व्यञ्जकतारूपा पदप्रकाशता भवति।

अत्र अविवक्षितवाच्यध्वनेः भेदस्य अत्यन्ततिरस्कृतवाच्यध्वनेः पदप्रकाशतायाः त्रीणि उदाहरणानि ग्रन्थकारेण प्रदत्तानि। तत्र एकैकं भवतः सौकर्याय विव्रियते-

(क) 'सप्तैताः समिधः श्रियः' इति प्रथममुदाहरणम्। इदं महर्षेः वेदव्यासस्य महाभारताद् उद्धृतम् अस्ति। पूर्णं पद्यम् एवमस्ति-

**धृतिः क्षमा दया शौचं कारुण्यं वागनिष्ठुरा।**
**मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः।।**

अर्थाद् धृतिः, क्षमा, दया, शौचं, कारुण्यम्, अनिष्ठुरा वाग् मित्राणामनभिद्रोहः इति एते सप्त श्रियः समिधः सन्ति। किन्तु समिधः पदस्य यज्ञीयकाष्ठमिति वाच्यार्थः। अयं वाच्यार्थः अभिधया वृत्त्या आयाति किन्तु, श्रियः=लक्ष्म्याः कृते समिधः-'यज्ञकाष्ठानि सन्ति' इति मुख्यार्थबाधो भवति। अतः वाक्यार्थस्य बोधाय समिधः इत्यस्य 'उपायाः, हेतवः वा' अर्थः क्रियते। तदा अर्थो भवति एते सप्त श्रियः प्राप्तौ उपायाः कारणानि वा सन्ति। परं समिधः इत्यस्य उपायाः इति अर्थस्तु अभिधया न आयाति। लक्षणा क्रियते। लक्षणया मुख्यार्थबाधादिकारणादि-कारणत्रयम् अपेक्ष्य लक्ष्यार्थः क्रियते। स लक्ष्यार्थः क्वचित् अर्थान्तरे सङ्क्रमितो भवति, क्वचित् च अत्यन्तं तिरस्कृतो भवति इति भवान् जानाति एव। यदा मुख्यार्थेन सम्बद्धः एव कश्चिद् विशिष्टः अर्थः लक्षणया क्रियते तदा अर्थान्तरसङ्क्रमितः वाच्यार्थः इति कथ्यते। यदा अत्यन्तं तिरस्कृतः वाच्यार्थो भूत्वा अतिशयेन भिन्नः अर्थो भवति तदा अत्यन्ततिरस्कृतवाच्यार्थो भवति। अतः अत्र समिधः इत्यस्य काष्ठरूपः वाच्यार्थः अत्यन्तं तिरस्कृतः अस्ति। यतोहि लक्ष्यार्थः उपायरूपः अर्थः वाच्यार्थाद् अत्यन्तं भिन्नः अस्ति। यद् हि "तन्त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि" इत्यादि मन्त्रेण प्रतिपादिताद् वर्धनसाधर्म्यात् 'समिधः पदं लक्ष्म्याः अन्यानपेक्षायाः वृद्धेः हेतुतायाः बोधनं कारयति। एतस्मात् कारणाद् अत्र अत्यन्ततिरस्कृतवाच्यध्वनेः उदाहरणमस्ति। अत्यन्ततिरस्कृतवाच्यार्थं समिध इत्येकमेव पदम् व्यञ्जकतया अत्र व्यङ्ग्यार्थविशेषं प्रददाति इति पदप्रकाशता।

(ख) 'कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायाम्। इदं द्वितीयमुदाहरणम्। इदं पद्यं महाकवेः कालिदासस्य मेघदूतमिति नामके- खण्डकाव्ये वर्तते। पूर्णं पद्यमेवमस्ति-

**त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः**



Scanned with CamScanner

प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षते जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः।।

अर्थात् हे मेघ! पवनपदवीं (आकाशमार्गम्) आरूढं (प्राप्तम्, आकाशमार्गेण गच्छन्तं) त्वाम् उद्गृहीतालकान्ताः प्रत्ययादाश्वसत्यः पथिकवनिताः प्रेक्षिष्यन्ते। त्वयि सन्नद्धे अहमिव अन्यः जनः न स्यात् यः पराधीनवृत्तिः (स्यात्)।

अत्र अयं भावः, मेघदूताभिधे खण्डकाव्ये वर्णितम् अस्ति यद् कुबेरेण शापितः यक्षः आषाढमासस्य प्रथमे दिवसे आकाशमण्डले मेघम् अवलोक्य स्वकीयां प्रियां प्रति स्वीयं सन्देशः प्रापयितुं तं प्रार्थयामास। सः अलकापुरीम्प्रति गन्तुं मेघाय मार्गं सन्दिशति। अस्मिन् एव प्रसङ्गे (पूर्वमेघे) इदं पद्यमस्ति। यक्षः कथयति यद् हे मेघ! वायुमार्गेण गच्छन्तं भवन्तम् अवलोक्य पथिकानां प्रोषितभर्तृकाः स्त्रियः हस्ताभ्यां स्वकीयान् केशान् संयमय्य "मे पतिः अवश्यमेव आगमिष्यतीति" विश्वासाद् धैर्यपूर्वकं प्रतीक्षां करिष्यन्ति। यतोहि केवलं शापपरवशं पराधीनञ्च मां विहाय कोऽन्यः पुमान् यः त्वयि आकाशे आगते स्वीयां विरहव्यथितां प्रियाम् उपेक्षेत।

अस्मिन् पद्ये 'सन्नद्धे' इति पदम् अस्ति। इदं 'णह् बन्धने' इत्यस्माद् धातोः निष्पन्नं भवति। (सम्+णह्+क्त=सन्नद्धः तस्मिन् सन्नद्धे) अस्य पदस्य मुख्यार्थो भवति सम्यक्रूपेण बद्धः अथवा कवचधनुर्बाणादिभिः संयुक्तः। किन्तु अत्र 'सन्नद्ध इति पदस्य मुख्यार्थः बाधितो भवति। यतोहि अस्मिन् वाक्ये सन्नद्ध' इत्यस्य 'बद्धः अथवा शस्त्रादिभिः सन्नद्धः' एव रूपः अर्थः न संगच्छते इति हेतोः अत्र मुख्यार्थबाधः भवति। बाधे जाते वाक्यार्थस्य बोधनाय लक्षणावृत्तिः आश्रीयते। यया वृत्त्या त्वयि आकाशे 'आगते' अथवा त्वयि आकाशे उद्यते' इत्यादिरूप अर्थः भवति। अयं अर्थः वाच्यार्थाद् अतीव भिन्नः। एतस्मात् कारणाद् अत्यन्तं तिरस्कृतः इति मन्तव्यः। अनेनैव सन्नद्धे इति पदेन कश्चन अतिशयः व्यज्यते। स च व्यङ्ग्यार्थः प्रधानीभूतः सन् ध्वनिरूपतां याति इति। अत्र अत्यन्ततिरस्कृतवाच्यस्य व्यञ्जकत्वाभिप्रायेण पदप्रकाशता वर्तते।

(ग) 'किमिव हि मधुराणां मण्डनं नाकृतीनामिति तृतीयमुदाहरणम्। इदं पद्यं महाकवेः कालिदासस्य 'अभिज्ञानशाकुन्तलमिति नामाधेयात् नाटकाद् उद्धृतमस्ति। पूर्णं पद्यमेवमस्ति-

**सरसिजमनुविद्धं शैवलेनापि रम्यं,**
**मलिनमपि हिमांशोः लक्ष्म लक्ष्मीं तनोति।**
**इयमधिकमनोज्ञा बल्कलेनापि तन्वी**
**किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।**

अर्थात् शैवलेन अनुविद्धमपि सरसिजं रम्यं भवति। हिमांशोः मलिनमपि लक्ष्म लक्ष्मीं तनोति। बल्कलेन अपि इयं तन्वी अधिकमनोज्ञा अस्ति। हि मधुराणाम् आकृतीनां मण्डनं किमिव।

शकुन्तलायाः सौन्दर्यम् अवलोक्य राजर्षिः दुष्यन्तः कथयति- यद् यथा शैवालादिना जलीय-अवस्करादिभिः परिवृतमपि कमलं सुन्दरं प्रतिभाति। चन्द्रमसः कलङ्कसहितमपि बिम्बं शोभां स्वीयां विस्तारयति एव। तत्र चन्द्रमसः शोभायाः विस्तारे दर्शने वा कलङ्को बाधको न भवति। तथा एव इयं मम पुरः विद्यमाना शकुन्तला यद्यपि तपोवने निवासस्य कारणात् तापसजनोचितं वल्कलं परिधृतवती। तथापि अतीव सौन्दर्यशालिनी प्रतिभाति। इदमेव उपर्युक्तं तथ्यम् अर्थान्तरेण साध्यते- हि=इति निश्चयेनैव मधुराणां=रमणीयानाम् आकृतीनां स्वरूपाणां मण्डनं=अलङ्कारादिभिः परिमण्डनं किमिवेति उपेक्षयाम् उक्तम्।

Scanned with CamScanner

अत्र 'मधुराणाम्' इति पदं माधुर्यस्य वाचकम्। माधुर्यं हि जलादीनां गुण:, न तु आकृतीनाम्। अत: मधुराणाम् आकृतीनां मण्डनं किमिव' इत्यत्र मुख्यार्थबाधो भवति। तथा वाक्यार्थस्य उपपत्तये लक्षणावृत्ति: आश्रीयते। इयं लक्षणा माधुर्यरूपाद् वाच्यार्थाद् अतीव भिन्नं सुन्दराणामित्यस्य अर्थस्य बोधिका भवति। एतस्य पदस्य आधारेण शकुन्तलाया: सौन्दर्यातिशय-रूपस्य व्यङ्ग्यार्थस्य प्रतीति: भवति। अतोऽत्र लक्षणामूलध्वने: अत्यन्ततिरस्कृतवाच्यध्वने: पदप्रकाशताया: उदाहरणमस्ति। एवमत्र अत्यन्ततिरस्कृतवाच्यध्वने: पदप्रकाशताया: त्रीणि उदाहरणानि भवता पठितानि। भवत: सौकर्याय अधस्ताद् मूलपाठ: प्रस्तूयते। तस्यार्थ: च लिख्यते-

---

**मूलपाठ:**

---

**अविवक्षितवाच्यस्यात्यन्ततिरस्कृतवाच्ये 'प्रभेदे' पदप्रकाशता, यथा महर्षेर्व्यासस्य- 'सप्तैता: समिध: श्रिय:।' यथा वा कालिदासस्य-**

**'क: सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायाम्।'**

**यथा वा-**

**'किमिव हि मधुराणां मण्डनं नाकृतीनाम्।''**

**एतेषूदाहरणेषु 'समिध:' इति 'सन्नद्धे' इति मधुराणामि' ति च पदानि व्यञ्जकत्वाभि-प्रायेणैव कृतानि।।''**

---

व्याख्या– अस्मिन् पाठ्यांशे अविवक्षितवाच्यध्वने: अत्यन्ततिरस्कृतवाच्यस्य पदप्रकाशताया: व्यञ्जकत्वस्य अभिप्रायेण त्रीणि उदाहरणानि आचार्येण प्रस्तुतानि। प्रथमम् उदहरणम् अस्ति-

'सप्तैता: समिध: श्रिय:' इति। एता: उपर्युक्ता: धृति: क्षमेत्यादय: श्रिय: राजलक्ष्या: श्रिय: प्राप्तौ वा, समिध: उपाया:, हेतव: सन्ति। एतेषामुदाहरणानां विस्तृतं विवेचनं भवता ''अत्यन्ततिरस्कृतवाच्यध्वने: पदप्रकाशता' इति उपशीर्षकस्य व्याख्याने पठितमेव।

द्वितीयम् उदाहरणम् अस्ति- क: सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायामिति। त्वयि मेघे, सन्नद्धे=आकाशमण्डले आगते, आकाशे अवलोकिते वा, विरहविधुराम्= विरहेण वियोगेन, विधुराम्=पीडिताम्, प्रोषितभर्तृकामित्यर्थ: जायाम्=धर्मपत्नीं, जायते गर्भ: अस्यामिति जायाम्। जायाशब्दस्य द्वितीयान्तमेकवचनम्, उपेक्षेत=उपेक्षां कुर्वीत। अर्थात् शापवशीभूतात् परतन्त्राद् मदतिरिक्त: क: जन: लोके वर्तते य: विरहेण पीडितां स्वीयां प्रेयसीं त्वयि आकाशमण्डले अवलोकिते सति उपेक्षेत इति। अत्र भवान् ज्ञातवान् एव यत् 'सन्नद्ध:' इति पदं सम् उपसर्गकाद् णह् बन्धने इत्यस्माद् धातो: क्त प्रत्यये कृते सप्तम्यामेकवचने निष्पद्यते, यस्य वाच्यार्थो भवति अस्त्र शस्त्रादिना अथवा स्वोचितोपकरणादिना सुसज्जित:। परमेवं भूते अर्थे कृते अत्र बाध: उपस्थितो भवति। जाते सति मुख्यार्थबाधे लक्षणया वृत्त्या उद्यते इति लक्ष्यार्थो भवति। येन अत्र मुख्यार्थ: अत्यन्तं तिरस्कृत: जात:।

एवमेव तृतीयमुदाहरणमस्ति- ''किमिव हि मधुराणां मण्डनं नाकृतीनामि'ति। मधुराणां=मनोहराणां, सुन्दराणाम्, आकृतीनां=स्वरूपाणां शरीराणामिति वा मण्डनम्=आभूषणम्, मण्ड्यते अनेनेति मण्डनम् किमिव अर्थाद् निष्प्रयोजनम् इति। अत्र मधुर-शब्दस्य वाच्यार्थ: मिष्टमित्यर्थो भवति। इयं मधुरता जलादीनां गुण:, तथा च भावपदार्थ:। आकृति:=स्वरूपम् शरीरम् वेति। शरीरस्य विशेषणरूपेण 'मधुर' इत्यस्य प्रयोगे सति वाच्यार्थबाधो भवति इति हेतो: लक्षणया अर्थ कृत्वा वाक्यार्थबोध: क्रियते। लक्ष्यार्थो भवति सुन्दराणामिति, यो हि आकृतीनामित्यस्य विशेषणं भवितुमर्हति। किञ्च, अस्य लक्ष्यार्थस्य स्वीकृते मुख्यार्थ: (माधुर्यरूप:) अत्यन्तमेव

Scanned with CamScanner

तिरस्कृत: जात:। अतोऽत्रापि अत्यन्ततिरस्कृतवाच्य: वर्तते। तथा च इमानि त्रीणि अपि लाक्षणिकानि पदानि महाकविना स्वकाव्ये व्यञ्जकत्वाभिप्रायेण उक्तानि। अत: एतेषां स्थले अत्यन्ततिरस्कृत-वाच्यध्वनि: भवति। अत एव उच्यते- एतेषूदाहरणेषु= समिध: इति सन्नद्धे इति, मधुराणामिति च पदानि व्यञ्जकत्वाभिप्रायेण=व्यञ्जकशब्दस्य अभिप्रायेण=तात्पर्येण कृतानि=योजितानीति।

"सप्रैता: समिध: श्रिय:" इत्यत्र अनुष्टुप् वृत्तम्।

तल्लक्षणञ्च-

**श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।**
**द्विचतुष्पादयो: ह्रस्वं सप्तमं दीर्घमन्ययो:।।** इति

अर्थाद् यस्य पद्यस्य प्रत्येकं चरणे अष्टौ अक्षराणि भवन्ति। प्रत्येकं चरणेषु पञ्चमं लघु, षष्ठं दीर्घम्, तथा द्वितीयचतुर्थयो: सप्तम् अक्षरं ह्रस्वं, प्रथमतृतीययो: चरणयो: सप्तमम् दीर्घम् च भवति, तद् श्लोक नामकम् अनुष्टुप्जातौ विद्यमानं वृत्तं भवति।

"क: सन्नद्धे विरहविधुरामित्यत्र मन्दाक्रान्तावृत्तम्। भवान् जानाति एव यत् सम्पूर्णे मेघदूते मन्द्रक्रान्तावृत्तमेव अस्ति। इदं पद्यं पूर्वमेघस्यैव अस्ति। अत्र मन्दाक्रान्तावृत्तम्। मन्दाक्रान्ताया: लक्षणम् अस्ति। मन्द्राक्रान्ताम्बुधिरसनगैर्भोमनौ तौ गयुग्मम्।" अर्थाद् अस्मिन् वृत्ते प्रत्येकं चरणे मगण:, भगण:, नगण:, तगणौ, द्वौ गुरुवर्णौ च क्रमेण भवन्ति, चतुर्षु, षट्सु सप्तसु अक्षरेषु च यति: भवति।

किमिव हि मधुराणामित्यस्मिन् पद्ये मालिनी वृत्तम्। अस्य लक्षणं छन्दोमञ्जर्या-मेवमुक्तम्=ननमयययुतेयं मालिनी भोगिलोकै:। अर्थाद् यस्य पद्यस्य प्रत्येकं चरणे क्रमेण नगण:, नगण:,मगण:, यगण:, यगण: इति पञ्चगणा: पञ्चदशाक्षराणि तथा अष्टाभि: सप्तभिश्च अक्षरै: यति: भवति, तद् मालिनीनामकं वृत्तं भवति।

**बोधप्रश्न:**

४. सप्रैता: इत्यत्र किं छन्द:, पूर्णं पद्यं लिखतु?

५. किमिव हि मधुराणामिति पद्यं कुत: गृहीतम्।

६. क: सन्नद्धे इति पदस्य मुख्यलक्ष्यार्थौ कौ?

### ११.३.२ अर्थान्तरसङ्क्रमितवाच्यध्वने: पदप्रकाशता

अविवक्षितवाच्यध्वने: (लक्षणामूलध्वने:) द्वौ भेदौ भवत:। अत्यन्ततिरस्कृत-वाच्यध्वनि: अर्थान्तरसङ्क्रमितवाच्यध्वनिश्चेति। भवान् पूर्वस्मिन् (११.३.१) उपशीर्षके पठितवान्। यत्र मुख्यार्थ: अर्थान्तरे अर्थात् स्वसम्बद्धे एव कस्मिंश्चित् विशिष्टे अर्थे सङ्क्रमितो भवति तत्र अर्थान्तरसङ्क्रमितवाच्यध्वनि: भवति। तत्रापि वाच्यार्थ: अभिधया बोध्यो भवति। तस्मिन् वाच्यार्थबाधे जाते वाक्यार्थबोधनाय लक्षणया: प्रयोग: क्रियते। सा लक्षणा यं लक्ष्यार्थं बोधयति स: अर्थ: अत्यन्ततिरस्कृतवाच्यार्थ इव वाच्याद् सर्वथा पृथग् न भवति, अपितु वाच्यार्थेनैव सम्बद्ध: कश्चन विशिष्ट: अर्थो भवति। तदा तत्र अर्थान्तरसङ्क्रमितवाच्य: लक्ष्यार्थो भवति। अर्थाद् यत्र लक्ष्यार्थे वाच्यार्थ: अर्थान्तरे सङ्क्रमित: स:। यथा- काव्यप्रकाशे "त्वामस्मि वच्मि विदुषा"मित्यस्मिन् पद्ये 'वच्मि' इति पदस्य 'वदामीत्येवं रूप: मुख्यार्थ: (वाच्यार्थ:) उपदिशामीत्यस्मिन् अर्थान्तरे सङ्क्रमित: इति। तथा च तस्मादेव अर्थान्तरसङ्क्रमित-वाच्याद् कश्चन प्रतीयमान: अर्थ: आयाति तदा तस्य प्रतीयमानस्य प्रधानतायां चमत्कारावस्थायां च ध्वनि:

Scanned with CamScanner

भवति। तदा अर्थान्तरसङ्क्रमितवाच्यध्वनि: इति नाम भवति। यद्यपि तत्र एकेनैव पदेन विशेषेण ध्वननं भवति इति हेतोः पदप्रकाशता भवति।

प्रकृते आनन्दवर्धनेन अर्थान्तरसङ्क्रमितवाच्यध्वनेः उदाहरणरूपेण ''रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम्'' इति पद्यांशः उद्धृतः। अयं पद्यांशः भवभूति-विरचितस्य उत्तररामचरितमित्याख्यस्य नाटकस्य कस्मिंश्चिदपि अङ्के नास्ति। वक्रोक्तिजीविते इदं पद्यम् उत्तरामचरिते इति कृत्वा उद्धृतम्। पूर्णं पद्यमेवमस्ति-

**प्रत्याख्यानरुषः कृतं समुचितं क्रूरेण ते रक्षसा,**<br>
**सोढं तच्च तथा त्वया कुलजनो धत्ते यथोच्चैः शिरः।**<br>
**व्यर्थं सम्प्रति बिभ्रता धनुरिदं त्वद्व्यापदः साक्षिणा**<br>
**रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम्।**

अर्थात् क्रूरेण रक्षसा प्रत्याख्यानरुषः ते समुचितं कृतम्। तच्च त्वया तथा सोढं यथा कुलजनः उच्चैः शिरः धत्ते। त्वद् व्यापदः साक्षिणा व्यर्थम् इदं धनुः बिभ्रता प्रियजीवितेन रामेण हे प्रिये! प्रेम्णः उचितं न कृतम् इति अर्थः।

अत्र 'हे प्रिये! प्रियजीवितेन रामेण प्रेम्णः उचितम् न कृतम्' इत्यस्मिन् वाक्ये 'रामेण' इति पदं साहसैकरसत्वस्य, सत्यसन्धत्वस्य विशिष्टार्थस्य रामस्य बोधकम् अस्ति। अतः अत्र 'रामेण' इति पदम् अर्थान्तरसङ्क्रमितवाच्यस्य व्यञ्जकमस्ति।

अत्रायं भावः 'रामेण' इत्यस्मिन् पदे अभिधया अर्थः क्रियते। तदा केवलं दशरथापत्यस्य रामस्य बोधो भवति। येन वाच्यार्थेन अस्मिन् वाक्ये संगतिः न भवति, मुख्यार्थस्य बाधात्। फलतः वाक्यार्थेऽवगते लक्षणया 'रामेण' इति पदेन साहसैकरसत्वस्य सत्यसन्धत्वस्य रामस्य बोधः क्रियते। अयम् अर्थः मुख्यार्थेन 'दशरथापत्य' इत्यर्थेन किञ्चिद्विशिष्टः ''साहसैकरसत्वेन रामेण'' इति भवति। अतः मुख्यार्थात् कश्चन भिन्नः अर्थः न जातः, अपितु मुख्यार्थेन सम्बद्धः एव साहसैकरसत्वेन रामेण इत्येवं रूपः अर्थः जातः। एतस्मात् कारणादत्र अर्थान्तरसङ्क्रमितवाच्यता, तस्य ध्वन्यमानत्वाच्च अर्थान्तरसङ्क्रमितवाच्यध्वनिः। तथा च केवलेन एकेन ''रामेण'' इति पदेन व्यञ्जनाद् अर्थान्तरसङ्क्रमिवाच्यध्वनेः पदप्रकाशताया इदमुदाहरणम्।

अस्यैव अर्थान्तरसङ्क्रमितवाच्यस्य द्वितीयमुदाहरणं ग्रन्थकारः प्रददाति-

**एमेअ जाणो तिस्सा देउ कवोलोपमाइ ससिबिंबम्।**<br>
**परमत्थविआरे उण चन्दो चन्दो विअ वराओ।।**

**एवमेव जनस्तस्याः ददाति कपोलोपमायां शशिबिम्बम्।**<br>
**परमार्थविचारे पुनश्चन्द्रश्चन्द इव वराकः।।**

अस्मिन् पद्ये कश्चिद् जनः कस्याश्चित् तरुण्याः सौन्दर्यविषये विचारयति। यद्यपि गतानुगतिको लोकः तस्या तरुण्याः कपोलबिम्बयोः उपमानरूपेण शशिनः बिम्बम् मूर्तिम् योजयति। अर्थात् चन्द्रमसः बिम्बेन सुन्दर्याः कपोलद्वयम् उपमाति। किन्तु यथार्थरूपेण विचार्यमाणे सति इदं स्पष्टं भवति यत् कपोलयोः तुलनां कर्तुं चन्द्रः उचितः नास्ति।

अत्र पद्यस्य चतुर्थचरणे लिखितमस्ति 'चन्दः चन्द इव वराकः।' अर्थात् वराकः चन्द्र चन्द्र एवास्ति। तेन सह कपोलयोः तुलना उचिता नास्ति। अत्र प्रथमचन्द्रपदं चन्द्रमसः एव वाचकम्। परन्तु द्वितीयं चन्द्रपदं क्षयशीलत्वस्य, विलासशून्यत्वस्य, मलिनत्त्वस्य चन्द्रस्य लक्षकम् अस्ति। वस्तुतः चन्द्रः चन्द्र एव-इत्यत्र उभयोः चन्द्रपदयोः वाच्यार्थे स्वीकृते मुख्यार्थबाधः भवति। जाते मुख्यार्थबाधे लक्षणावृत्तिः आयाति। तया वृत्त्या द्वितीयस्य चन्द्रपदस्य मलिनत्वादि-विशिष्टः चन्द्रः अर्थः गृह्यते। एतस्मात् कारणाद् अत्र वाच्यार्थः अर्थान्तरे संक्रमितः सन् व्यञ्जकत्वेन

Scanned with CamScanner

मलिनत्वादिविशिष्टमर्थं व्यनक्तीति अर्थान्तरसङ्क्रमितवाच्यध्वनेः पदप्रकाशता।

मूलग्रन्थः

तस्यैवार्थान्तरसङ्क्रमितवाच्ये यथा- ''रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितमित्यत्र 'रामेण' इत्येतत् पदं साहसैकरसत्वादिव्यङ्ग्याभिसङ्क्रमितवाच्यं व्यञ्जकम्। यथा-

एवमेव जनस्तस्या ददाति कपोलोपमायां शशिबिम्बम्-

परमार्थविचारे पुनश्चन्द्रश्चन्द्र इव वराकः।।

अत्र द्वितीयश्चन्दशब्दोऽर्थान्तरसङ्क्रमितवाच्यः।

व्याख्या- तस्यैव ध्वनेः अर्थाद् अविवक्षितवाच्यध्वनेः अर्थान्तरसङ्क्रमितवाच्ये- द्वितीये भेदे। प्रथमम् उदाहरणम्- ''रामेणेति। तत्र 'रामेण' इत्येतत् पदं वाच्यार्थरूपे दशरथापत्यार्थे बाधितः सन् साहसैकरसत्वादिविशिष्टस्य रामेण इत्यस्य लक्षकम् अस्ति।

'यथा वा' इत्यनेन द्वितीयमुदाहरति एवमेव जनस्तस्या इत्यादिना-

जनः=गड्डलिकाप्रवाहेण प्रवृत्तो लोकः, एवमेवः परमार्थम् अविचार्य एव, गम्भीरतया विचारं विनैव, तस्याः सुन्दर्याः नायिकायाः कपोलोपमायाम्=कपोलयोः गण्डयोः उपमायाम् सादृश्ये उपमानत्वेन शशिबिम्बम्=चन्द्रमसः मण्डलं ददाति-स्थापयति कथयति इति वा। परमार्थविचारे- यथार्थ-रूपेण विचारणायां, पुनः=तु वराकः=कृपणः, चन्द्रः इन्दुः, चन्द्रः एव कलङ्कसंयुतः तुच्छः चन्द्रः अस्ति। अर्थात् कपोलयोः तुलनायाम् अतीव तुच्छम् अस्ति। मालिन्यादिगुणसहितत्वादिति भावः। अत एव, अत्र=एवमेवेति पद्ये द्वितीयः चन्द्रशब्दः अर्थान्तरसङ्क्रमितवाच्यः=अर्थान्तरे= चन्द्रत्वादिविशिष्टचन्द्ररूपात् वाच्यार्थाद् भिन्ने मलिनत्वादिविशिष्टे चन्द्ररूपे लक्ष्यार्थे सङ्क्रमितः इति।

अनयोः द्वयोः उदाहरणयोः ''रामेण प्रियजीवितेन'' इत्यस्मिन् पद्ये शार्दूलविक्रीडितम् नामकं वृत्तमस्ति। अस्य लक्षणमस्ति-सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।''

अर्थाद् यस्य पद्यस्य प्रत्येकं चरणे क्रमेण मगण-सगण-जगण-सगणाः ततो तगणद्वयं तत एको गुरुर्भवति तद्वृत्तं शार्दूलविक्रीडितं नाम छन्दः। अत्र द्वादशभिः अष्टाभिश्च अक्षरैः यतिः भवति। 'एवमेव जनस्तस्याः' इत्यस्मिन् द्वितीये उदाहरणे आर्यावृत्तम्। लक्षणं तु प्रागेवोक्तम् दशमे पाठे।

**बोधप्रश्नः**

७. अर्थान्तरसङ्क्रमितवाच्यध्वनेः इत्यस्य कोऽर्थः?

८. रामेण प्रियजीवितेन इत्यत्र कथं पदप्रकाशता?

९. चन्द्रश्चन्द्रः पुनः वराकः इत्यत्र कः ध्वनिप्रकाशता?

१०. रामेण प्रियजीवितेन इत्यत्र किं छन्दः?

### ११.३.३ अत्यन्ततिरस्कृतवाच्यध्वनेः वाक्यप्रकाशता

इदानीम् अत्यन्ततिरस्कतवाच्यध्वनेः वाक्यप्रकाशतायाः उदाहरणं प्रददाति ग्रन्थकारः।

Scanned with CamScanner

अविवक्षितवाच्यस्यात्यन्ततिरस्कृतवाच्ये प्रभेदे सम्पूर्णं वाक्यमेव व्यञ्जकं भवति। तथा च तस्मिन् व्यञ्जके पद्ये अनेकानि पदानि व्यञ्जकानि भवन्ति, किं वा सम्पूर्णस्य वाक्यस्यैव व्यञ्जकता तत्र दृश्यते। अर्थात् प्रथमं वाक्यस्य मुख्यार्थबाधो भवति, बाधिते मुख्यार्थे लक्षणया मुख्यार्थाद् अतीव भिन्नः अर्थः गृह्यते। तस्य अर्थस्य माध्यमेन व्यङ्ग्यार्थस्य प्रतीतिः भवति। अतोऽस्य अविवक्षितवाच्यस्य अत्यन्ततिरस्कृत वाच्यस्य भेदस्य वाक्यप्रकाशतायाः विषयः स्वीक्रियते।

यथा ध्वन्यालोके वाक्यप्रकाशतायाः विषये गीतायाः द्वितीयस्य अध्यायस्य एकं पद्यम् उद्धृतम् आनन्दवर्धनेन। तथाहि-

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।।

यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।

अस्य भावार्थः अस्ति यद् या सर्वभूतानां कृते रात्रिः अस्ति, तस्यां रात्री संयमी-तत्त्वज्ञानी पुरुषः जागरणं करोति। यस्याम् अवस्थायां यस्मिन् दिवसे वा भूतानि जागरणं कुर्वन्ति, सा पश्यतः तत्त्वज्ञानिनः पुरुषस्य कृते रात्रिः अस्ति।

अनेन कथनेन न हि कश्चिद् उपदिष्टो भवति। यत् निशायां जागरितव्यं दिवसे न रात्रिवदासितव्यमिति। तर्हि एतस्य कथनस्य किं तात्पर्यम्? इति जिज्ञासायां बाधितस्वार्थम् एतद् वाक्यं संयमिनो मनुष्यस्य लोकोत्तरतालक्षणेन निमित्तेन तत्त्वदृष्टौ अवधानं मिथ्यादृष्टौ च पराङ्मुखत्वं ध्वनति। सर्वेषां ब्रह्मादिस्थावरान्तानां चतुर्दशानामपि भूतानां या निशा व्यामोहजननी अस्ति। संयमी अर्थात् तत्त्वदृष्टिः पुरुषः तस्यां जागर्ति। एवमस्मिन् पद्ये यः वाच्यार्थः स भङ्गिमयुक्तः तथाविधस्य वाच्यार्थस्य किमपि प्रयोजनं न प्रतिभाति। अतो हेतोः वाक्यार्थस्य बाधो भवति। वाक्यार्थबाधे जाते लक्षणायाः साहाय्येन मुख्यार्थाद् भिन्नः अर्थः- संयमिनः तत्त्वदृष्टौ अवधानं, मिथ्यादृष्टौ च पराङ्मुखत्वं च ध्वन्यते। अतोऽत्र अविवक्षितवाच्यध्वनेः अत्यन्ततिरस्कृतवाच्यस्य व्यञ्जकतया वाक्यप्रकाशता अस्ति इति बोध्यम्।

---

मूलपाठः

**अविवक्षितवाच्यस्य-अत्यन्ततिरस्कृतवाच्ये प्रभेदे वाक्यप्रकाशता, यथा-**

**या निशा सर्वभूतानां तस्यां जागर्ति संयमी।**
**यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।।**

**अनेन हि वाक्येन निशार्थो, न जागरणार्थः कश्चिद् विवक्षितः। किं तर्हि? तत्त्वज्ञानावहितत्त्वमतत्त्वपराङ्मुखत्वं च मुनेः प्रतिपाद्यत इति तिरस्कृतवाच्यस्यास्य व्यञ्जकत्वम्।**

---

अविवक्षितं वाच्यं यत्र तस्य ध्वनेः प्रथमे अत्यन्ततिरस्कृतवाच्यनामके प्रभेदे पदप्रकाशतायाः त्रीणि उदाहरणानि प्रदाय इदानीं वाक्यप्रकाशताम् अस्य बोधयितुम् गीतायाः पद्यम् उल्लिखति ग्रन्थकारः-

सर्वभूतानाम्-सर्वेषां ब्रह्मादिस्थावरपर्यन्तानां चतुर्दशानामपि भूतानाम्। ब्रह्मणः आरभ्य स्थावरपर्यन्तं चतुर्दशसंख्याकानि भूतानि, अष्टौ दैवतानि, एको मनुष्यः, पञ्च तिर्यञ्चः इति आहत्य चतुर्दशभूतानि भवन्ति। तस्यां निशायां संयमी तत्त्वज्ञानी पुरुषः जागर्ति-निद्रां नोपसवते। यस्याम् अवस्थायाम् अर्थाद् दिवसे, भूतानि जाग्रति जागरणं कुर्वन्ति, सा पश्यतः-सिद्धस्य मुनेः-मन्यते ब्रह्मज्ञानं वेदशास्त्राणि वा अवगच्छति इति मुनिः तस्य निशा रात्रिः इत्ययं वाच्यार्थः। किन्तु अयं वाच्यार्थः प्रयोजनाभावाद् बाधितः सन् तत्त्वज्ञानावहितत्त्वम् अतत्त्वपराङ्मुखत्वं च मुनेः प्रतिपाद्यत

Scanned with CamScanner

इति अत्यन्ततिरस्कृतवाच्यत्वम्। तथाहि, अनेन वाक्येन निशार्थः-रात्र्यर्थः न विवक्षितः न वा जागर्ति इति जागरणार्थः विवक्षितः। किं तर्हि-यदि पूर्वोक्तः न विवक्षितः, तदा किं विवक्षितः इति जिज्ञासायाम् उच्यते-तत्त्वज्ञानावहितत्वम्-मुनेः तत्त्वज्ञानेसावधानत्वम्। अतत्त्वपराङ्मुखत्वम्-मुनेः अतत्त्वपदार्थात् पराङ्मुखत्वं च प्रतिपाद्यते-कथ्यते। इति तिरस्कृतवाच्यस्य व्यञ्जकत्वं बोध्यम्।

**बोधप्रश्नः**

११. या निशेति पद्यस्य वाच्यार्थः कः व्यङ्ग्यार्थश्च कः?

१२. तत्त्वज्ञानावहितमित्यस्य कोऽर्थः?

१३. कथमत्र वाक्यप्रकाशता?

१४. कथमत्र तिरस्कृतवाच्यत्वम्।

## ११.३.४ अर्थान्तरसङ्क्रमितवाच्यध्वनेः वाक्यप्रकाशता

इदानीम् अविवक्षितवाच्यस्य द्वितीयस्य भेदस्य अर्थान्तरसङ्क्रमितवाच्यस्य वाक्यप्रकाशतायाः उदाहरणं प्रस्तौति श्रीमदानन्दवर्धनाचार्यः। तथाहि-

**विषमइयो काण वि काण वि बालेइ अमिअणिम्माओ।**
**काण वि विसामि अम ओ काण वि अविसामओ कालो।।**

**विषमयितः केषामपि केषामपि यात्यमृतनिर्माणः।**
**केषामपि विषामृतमयः केषामप्यविषामृतःकालः।।**

'या निशा सर्वभूतानामित्यत्र, केषामपि विषमयित इत्यत्र च अनेकेषां पदानां व्यञ्जकत्वेन वाक्यनिष्ठस्य व्यञ्जकत्वस्य उदाहरणम् अस्ति। या निशा इत्यत्र वाच्यार्थाद् भिन्नार्थस्य व्यञ्जकत्वेन अत्यन्ततिरस्कृतवाच्यस्य उदाहरणम् अस्ति। अत्र विषमयितः केषामपीत्यस्मिन् पद्ये वाच्यार्थस्य व्यञ्जकत्वेन किञ्चिदर्थान्तरे सङ्क्रमितत्वाद् अर्थान्तरसङ्क्रमितस्य उदाहरणम् अस्ति।

अस्मिन् 'विषमयितम्' इत्यादिपद्ये कालस्य चतसृणाम् अवस्थानां वर्णनमस्ति-

१. विषरूपः कालः

२. अमृतरूपः कालः

३. उभयात्मकः विषामृतरूपः कालः

४. अविषामृतरूपः अनुभयात्मकः कालः। तत्र रेखाचित्रेण एवं बोधयितुं शक्यते-

१. विषरूपः कालः- पापिनाम् (दुष्टानाम्) अतिविवेकिनाञ्च कृते

२. अमृतरूपःकालः- पुण्यात्मनाम् अविवेकिनां कृते च

३. विषामृतरूपः कालः- विवेकाविवेकवतां कृते उभयात्मकः

४. अविषामृतरूपः कालः- योगभूमिप्राप्तानां सिद्धानाम् अतीव मूढानां च कृते।

एवंरूपेण श्लोकस्य मुख्यार्थः (वाच्यार्थः) कविना अत्र वर्णितः। परं विषात्मकः

Scanned with CamScanner

अमृतात्मको वा कश्चन पेयपदार्थः (द्रवरूपः) भवति, न तु कालः इति सम्पूर्णेऽपि वाक्ये मुख्यार्थबाधः। यतो हि एवं विधस्य वाच्यार्थस्य किमपि प्रयोजनमेव नास्ति। यथा पूर्व या निशा सर्वभूतानामित्यत्र रात्र्यर्थस्य जागरणार्थस्य च प्रयोजनाभावात् वाच्यार्थस्य बाधः आसीत्। अतस्तत्र 'तत्त्वज्ञानावहितत्वम् अतत्त्वपराङ्मुखत्वम् च अर्थों गृहीतः। इमौ उभौ अर्थौ वाच्यार्थादतीव भिन्नौ आस्ताम् इति हेतोः तत्र अत्यन्ततिरस्कृतवाच्यध्वनेः वाक्यप्रकाशता आसीत्। अत्रापि विषामृतरूपः अर्थः अनुपपन्नो भवति इति हेतोः अत्र अर्थान्तरसङ्क्रमितवाच्यार्थों भवति। यथा विष इत्यस्य दुःखमित्यर्थः। अमृतमित्यस्य सुखमित्यर्थः। विषदुःखयोः अत्यन्तं भेदो नास्ति। उभयोः अनीप्सितत्वात्। तथैव अमृतसुखयोः अत्यन्तं भेदो नास्ति। उभयोः सर्वेषाम् कृते ईप्सितत्वात्। एवम् वाच्यार्थः अर्थान्तरं संक्रान्तः न तु सर्वथा तिरस्कृतः अस्ति। एतस्मात् कारणाद् अत्र अर्थान्तरसङ्क्रमितवाच्यध्वनिः।

विषरूपः कालः मुख्यार्थः- दुःखरूपः कालः अर्थान्तरसङ्क्रमितार्थः दुष्टादीनाम्। अमृतरूपकालः मुख्यार्थः सुखरूपःकालः अर्थान्तरसङ्क्रमितार्थः पुण्यात्मनाम्। विषामृतरूपःकालः मुख्यार्थः दुःखसुखरूपकालः अर्थान्तरसङ्क्रमितार्थः विवेकाविवेकवताम्।

अविषामृतरूपः कालः मुख्यार्थः अदुःखसुखरूपः कालः अर्थान्तर-सङ्क्रमितार्थः योगभूमिप्राप्तानाम्

**बोधप्रश्नः**

१५. विषामृतशब्दाभ्यां कोऽर्थः गृह्यते?

१६. उभयात्मकः कालः केषां कृते निर्धारितः।

१७. केषां कृते कालो न दुःखमयो नापि च सुखमयः?

---

**मूलपाठः**

**तस्यैवार्थान्तरसङ्क्रमितवाच्यस्य वाक्यप्रकाशता, यथा-**

**विषमयितः केषामपि यात्यमृतनिर्माणः।**
**केषामपि विषामृतमयः केषामप्यविषामृतः कालः।।**

**अत्र हि वाक्ये विषामृतशब्दाभ्यां दुःखसुखसङ्क्रमितवाच्याभ्यां व्यवहारः इत्यर्थान्तरसक्रमितवाच्यस्य व्यञ्जकत्वम्।**

---

**व्याख्या-** तस्यैव अविवक्षितवाच्यध्वनेरेव यः अर्थान्तरसङ्क्रमितवाच्यः तस्य वाक्यप्रकाशता निम्नलिखिते पद्ये प्रदर्श्यते इति भावः। केषामपि=पापानाम् अतिविवेकिनाञ्च। कालः समयः विषरूपो भवति। केषामपि=पुण्यात्मनाम् अविवेकिनाञ्च कृते कालः=समयः अमृतरूपो भवति। अमृतनिर्माणः याति=अमृतरूपतां प्राप्नोतीति भावः।

Scanned with CamScanner